# Purushottamena Lakshmyai Proktam Vadhubhih Japaniyah Mantrah

# पुरुषोत्तमेन लक्ष्म्यै प्रोक्तं वधूभिः जपनीयाः मन्त्राः

## Document Information


Text title : Purushottamena Lakshmyai Proktam Vadhubhih Japaniyah Mantrah

File name : puruShottamenalakShmyaiproktaMvadhUbhiHjapanIyAHmantrAH.itx

Category : misc, lakShmInArAyaNIyasaMhitA, lakShmI, mantra

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 62/6-71||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

Purushottamena Lakshmyai Proktam Vadhubhih Japaniyah Mantrah

# पुरुषोत्तमेन लक्ष्म्यै प्रोक्तं वधूभिः जपनीयाः मन्त्राः

मम नामस्मृतिसङ्कीर्तनाढ्यास्तु योषितः ।
त्वं लक्ष्मीर्मम सर्वस्वरूपा कृष्णस्य वल्लभा ॥ ६॥

गृहे क्षेत्रे तथा वासे तस्या वससि वर्ष्मणि ।
षोडशाऽक्षरमन्त्रं मे पठमाना पुरेन्द्रजा ॥ ७॥

जयन्ती जन्ममूका सा सार्वज्ञ्यं च सरस्वतीम् ।
प्राप पाण्डित्यमुत्कृष्टं बृहस्पतिसमाऽभवत् ॥ ८॥

"ॐ नमः श्रीकृष्णनारायणाय स्वामिने नमः" ।
इत्येवं जपकर्त्र्यां वै नैपुण्यं जायते मतौ ॥ ९॥

"ॐ नमः श्रीकृष्णनारायणाय पतये स्वाहा" ।
इति जपं प्रकुर्वन्त्याः सौभाग्यं सुस्थिरं भवेत् ॥ १०॥

"कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव" ॥ ११॥

इत्येवं जपमानाया नाथो नारायणस्त्वहम् ।
भूत्वा ददामि मे धामाऽक्षरं शाश्वतमोदनम् ॥ १२॥

"ब्राह्म्यहं श्रीकृष्णनारायणभक्ताऽस्मि शाश्वती ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे" ॥ १३॥

इत्येवं जपमाना वै लक्ष्मीरूपां करोम्यहम् ।
"बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ॥ १४॥

पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः" ।
इत्येवं जपमाना वै ब्रह्मप्रियां करोम्यहम् ॥ १५॥

"शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा" ।

इत्येवं जपमानाया नाशयाम्यघसञ्चयम् ॥ १६॥

“अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
परब्रह्माऽक्षरातीतोऽवताराणां स्वरूपधृक् ॥ १७॥

अन्तर्यामी सदाऽस्मासु भगवान् सर्वकारणम् ।
सर्वान्तरात्मा सर्वेशो निर्लेपो मोक्षदः स हि ॥ १८॥

पावनः सेवितो भुक्तिमुक्तिदश्च सदाऽवतु” ।
इत्येवं जपमानायै ददामि कमलापदम् ॥ १९॥

“ब्रह्मप्रियाः समस्ताश्च राधालक्ष्म्यादियोषितः ।
परब्रह्मस्वरूपाश्च परब्रह्मार्धमूर्तयः ॥ २०॥

परब्रह्मार्थसर्वस्वा दिव्या भुक्तिप्रमुक्तिदाः ।
तत्सम्बन्धिक्रियाश्चापि निर्गुणा मोक्षदाः सदा” ॥ २१॥

इत्येवं जपमाना वै मुक्तानीं प्रकरोम्यहम् ।
“यो यो या या बालकृष्णं तत्प्रियाश्च भजत्यपि ॥ २२॥

स सः सा सा तत्स्वरूपा दिव्या मोक्षप्रदा सदा” ।
इत्येवं जपमानाया दिव्यरूपं प्रजायते ॥ २३॥

“ॐ नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा ।
इत्येवं जपमाना स्वे रूपेऽन्तर्भावयाम्यहम् ॥ २४॥

“ॐ श्रीकृष्णनारायणः शरणं मे” इतिमनुम् ।
जपन्त्याः साधयाम्येव पुरुषार्थचतुष्टयम् ॥ २५॥

“कृष्णस्य प्रियभक्ताऽहं श्रीहरिः शरणं मम” ।
“श्रीकृष्णस्सर्वविद्याब्धिः श्रीस्वामी शरणं मम” ॥ २६॥

“श्रीकृष्णो वल्लभस्वामी श्रीहरिः शरणं मम” ।
इतिमन्त्रान् जपन्त्या मे नित्यवासोऽस्ति सा मयि ॥ २७॥

इमे मन्त्रा मया लक्ष्मि स्वमूर्तयः प्रकाशिताः ।
“मत्समा मत्स्वरूपास्ते मद्भक्तकार्यार्थसाधकाः” ॥ २८॥

श्रीकृष्णो वल्लभो नाथः शरणं मे” इति मनुः ।
सर्वार्थदो द्वादशार्णस्तन्माहात्म्यं वदामि ते ॥ २९॥

एतद्वै कथितं लक्ष्मि द्वादशाक्षरवैभवम् ॥ ३७॥

पठतां शृण्वतां चापि ध्रुवं वै परमं पदम् ।
अपि पापसमाचारा द्वादशाऽक्षरतत्परा ॥ ३८॥

प्राप्नोति परमं स्थानं मे शुभं त्वक्षराभिधम् ।
"ॐ" इत्येकाक्षरं मन्त्रं जपन् याति परां गतिम् ॥ ३९॥

"कृष्ण" इति द्व्यक्षरं मन्त्रं जपन् गोलोकमृच्छति ।
"श्रीकृष्ण" त्र्यक्षरं मन्त्रं जपन् गोलोकमुत्तमम् ॥ ४०॥

"वासुदेव" इति मन्त्रं वा "राधाकृष्ण" इति वा जपन् ।
चतुर्वर्णं मनुं याति त्वया कृतं निजालयम् ॥ ४१॥

"ॐ नारायण" पञ्चार्णं जपन् श्वेताक्षरं पदम् ।
"नमो नारायणाय" इति जपन् ब्रह्माक्षरं पदम् ॥ ४२॥

"ॐ श्रीकृष्णनारायण" जपन् यात्यक्षरं पदम् ।
"लक्ष्मीनारायणश्रीरों" इति गृणन् विकुण्ठकम् ॥ ४३॥

"अनादिकृष्णनारायण" इत्यपि चाऽक्षरं पदम् ।
"अनादिश्रीकृष्णनारायण" इति दिव्यमक्षरम् ॥ ४४॥

"ॐ माणिकीश्रीकृष्णनारायण" इति पराऽक्षरम् ।
पदं याति जपन् देवि लक्ष्मि धामोत्तमोत्तमम् ॥ ४५॥

"ॐ सुखदा लक्ष्मी कृष्णनारायण" इति मत्पदम् ।
प्राप्नोति जपवान् भक्तो भक्तानी जपसंयुता ॥ ४६॥

"श्रीकृष्णो वल्लभः स्वामी शरणं मे" मनुं त्विमम् ।
मनुमूर्धन्यमुत्साहाज्जपन् याति ममान्तरम् ॥ ४७॥

"ॐ श्रीकृष्णाय नमः", "ॐ नारायणाय नमः" ।
"ॐ वासुदेवाय नमः" "ॐ महाविष्णवे नमः" ॥ ४८॥

"ॐ विष्णवे नमः" इति च "ॐ सदाशिवाय नमः" ।
"ओ हिरण्यगर्भाय नमः" "ॐ शिवाय नमः" तथा ॥ ४९॥

"ॐ रामादित्याय नमः" "ॐ नृसिंहाय नमः" च ।
"ॐ कपिलाय नमः", "ॐ श्रीहरये नमः" च ॥ ५०॥

“ॐ दत्तात्रेयाय नमः” “ओमृषभाय नमः” च ।
“ॐ वामनाय नमः” च “ॐ पर्शुरामाय नमः” ॥ ५१॥

“ॐ यज्ञाय नमः” “ॐ सनत्कुमाराय नमः” च ।
“ॐ व्यासाय नमः” इति च “ॐ बुद्धाय नमः” तथा ॥ ५२॥

“ॐ नरनारायणाय नमः” “ॐ ब्रह्मणे नमः” ।
“ॐ परब्रह्मणे नमः” “ओमन्तर्यामिणे नमः” ॥ ५३॥

“ॐ माधवाय नमः” च “ॐ गोविन्दाय नमः” च ।
ॐ केशवाय नमः” “ॐ श्रीपतये नमः” च ॥ ५४॥

“ॐ स्वामिने नमः” “ओमक्षरातीताय नमः” च ।
“ॐ पुरुषोत्तमाय नमः”, “ॐ परमात्मने नमः” ॥ ५५॥

“ओमनादिश्रीकृष्णनारायणाय विद्महे ।
गोपालकृष्णात्मजाय धीमहि ।
तन्नः कम्भराश्रीसुतः प्रचोदयात्” ॥ ५६॥

एते मन्त्राः सदा लक्ष्मि भुक्तिमुक्तिफलप्रदाः ।
तत्तद्धामप्रदाः सर्वे पापतापप्रणाशकाः ।
सर्वपुमर्थदाश्चापि सर्वेच्छापूरकास्तथा ॥ ५७॥

सहस्रं चाऽयुतं चापि लक्षं कोटिर्जपा मताः ।
यथाश्रद्धं यथासङ्ख्यं यथावेगं फलप्रदाः ॥ ५८॥

“ॐ श्रियै नमः” “ॐ लक्ष्म्यै नमः” “ॐ रमायै नमः” ।
“ॐ महालक्ष्म्यै नमः” “ॐ नारायण्यै नमः” च वै ॥ ५९॥

“ॐ ब्राह्म्यै नमः” “ॐ पुरुषोत्तम्यै नमः” तथा ।
“ॐ वैष्णव्यै नमः” “ॐ कमलायै नमः” “ॐ मायै नमः” ॥ ६०॥

“ॐ वासुदेव्यै नमः” “ॐ कृष्णायै नमः” इत्यपि ।
“ॐ माधव्यै नमः” “ॐ परमेश्वर्यै नमः” इति ॥ ६१॥

“ॐ शिवायै नमः” “ओमन्तर्यामिण्यै नमः” इति ।
“ॐ महावैष्णव्यै नमः” “ॐ पद्मायै नमः” तथा ॥ ६२॥

“ॐ कम्भरालक्ष्म्यै नमः” “ॐ प्रज्ञायै नमः” तथा, ।
“ॐ राधायै नमः” च “ॐ ब्रह्मप्रियायै नमः” च ॥ ६३॥

“ॐ हरिण्यै नमः” “ॐ हरिप्रियायै नमः” तथा ।
“ॐ हिरण्यमय्यै नमः” “ॐ कार्ष्णवाल्लभ्यै नमः” ॥ ६४॥

“ॐ पार्वत्यै नमः” “ॐ माणिक्यायै नम” इत्यपि ।
“ॐ सुखदालक्ष्म्यै नमः” “ॐ शिवराज्ञीश्रियै नमः” ॥ ६५॥

“ॐ नारायणीश्रियै नमः” “ॐ धामिन्यै नमः” ।
“ॐ सुखदालक्ष्म्यै विद्महे नारायणीश्रियै धीमहि ।
तन्नः शिवराज्ञीश्रीः प्रचोदयात् ॥ ६६॥

आ कृष्णाय विद्महे वल्लभाय धीमहि
प्रज्ञा तन्नः प्रचोदयात् ।
ॐ आचार्याय विद्महे गुरवे धीमहि
पार्वती नः प्रचोदयात् ॥ ६७॥

एते मन्त्राः सदा लक्ष्मि भुक्तिमुक्तिफलप्रदाः ।
यावत्पुमर्थदाः सर्वसुखवाञ्छाप्रपूरकाः ॥ ६८॥

शतं सहस्रं चायुतं नियुतं कोटिरित्यपि ।
जप्ताः श्रद्धान्वितास्त्वां मां स्मृत्वा शाश्वतकामदाः ॥ ६९॥

त्वमहं त्वमहं लक्ष्मि सोऽहं सोऽहं जपेच्च यः ।
स्मृत्वा मां चापि तस्मै च तस्यै ददाम्यहं निजम् ॥ ७०॥

ममासनं मम धाम ममात्मानं ददामि च ।
मद्भक्तार्थं मम सर्वं शेषयामि न चार्पणे ॥ ७१॥

(Mantras - given in inverted commas (‘-‘) above
are to be muttered by married women -
as told by Lord Purushottama to Shree Lakshmi)

इति श्रीलक्ष्मीनारायणीयसंहितायाः द्वापरयुगसन्तानात्मकस्य तृतीयखण्डे
६२-अध्यायान्तर्गतं पुरुषोत्तमेन लक्ष्म्यै प्रोक्तं वधूभिः जपनीयाः मन्त्राः ।

लक्ष्मीनारायणीयसंहिता । खण्ड ३। अध्याय ६२/६-७१॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 62/6-71..

Proofread by PSA Easwaran

*Purushottamena Lakshmyai Proktam Vadhubhih Japaniyah Mantrah*

pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*